श्रीमदाद्यशङ्कराचार्याणां परमगुरुवर—

परमपूज्य-श्रीगौडपादाचार्य-विरचिता

श्रीसुभगोदयस्तुतिः

—०—

भवानि ! त्वां वन्दे भवमहिषि सच्चित्सुखवपुः,
पराकारां देवीममृतलहरीमैन्दवकलाम् ।
महाकालातीतां [1]कलितसरणीकल्पिततनुं,
सुधासिन्धोरन्तर्वसतिमनिशं वासरमयीम् ॥१॥

मनस्तत्त्वं जित्वा नयनमथ नासाग्रघटितं,
[2]पुनर्व्यावृत्ताक्षः स्वयमपि यदा पश्यति पराम् ।
तदानीमेवास्य स्फुरति बहिरन्तर्भगवती,
परानन्दाकारा परशिवपरा काचिदपरा ॥२॥

मनोमार्गं जित्वा मरुत इह नाडीगणजुषो,
निरुद्ध्यार्कं सेन्दुं दहनमपि सञ्ज्वाल्य शिखया ।
सुषुम्णां संयोज्य श्लथयति च षड्ग्रन्थि-शशिनं,
तवाज्ञाचक्रस्थं [3]विलयति महायोगिसमयी ॥३॥

यदा तौ चन्द्रार्कौ निजसदनसंरोधनवशा—
[4]दशक्तौ पीयूषस्रवणहरणे सा च भुजगी ।
प्रबुद्धा क्षुत्क्रुद्धा दशति शशिनं बैन्दवगतं,
सुधाधारासारैः स्नपयसि तनुं बैन्दवकले ॥४॥

पृथिव्यापस्तेजः पवनगगने तत्प्रकृतयः,
[5]स्थितास्तन्मात्रास्ता विषयदशकं मानसमिति ।

१-कलितसरणिं कल्पिकतनुं । २-पुनर्व्यावृत्ताक्षिद्वयमपि । ३-श्लथयति, विलसति । ४-दशक्ता । ५-स्थितास्तन्मात्राप्ता ।

[1]ततो माया विद्या तदनु च महेशः शिव इतः,
परं तत्त्वातीतं मिलितवपुरिन्दोः परकला ॥५॥
कुमारी यन्मन्द्रं ध्वनति च ततो योषिदपरा,
कुलं त्यक्त्वा [2]रौति स्फुटति च [3]महाकालभुजगी ।
ततः पातिव्रत्यं भजति दहराकाशकमले,
सुखासीना योषा भवसि भवसीत्काररसिका ॥६॥
त्रिकोणं ते कौलाः कुलगृहमिति प्राहुरपरे,
चतुष्कोणं प्राहुः समयिन इमे बैन्दवमिति ।
[4]सुधासिन्धौ तस्मिन्सुरमणिगृहे सूर्यशशिनो—
रगम्ये रश्मीनां समयसहिते त्वं [5]विहरसे ॥७॥
त्रिखण्डं ते चक्रं शुचिरविशशाङ्कात्मकतया,
मयूखैः [6]षट्त्रिंशद्दशयुततया खण्डकलितैः ।
पृथिव्यादौ तत्त्वे पृथगुदितवद्भिः परिवृतं,
[7]भवेन्मूलाधारात्प्रभृति तव षट्चक्रसदनम् ॥८॥
शतं चाष्टौ वह्नेः[8] शतमपि कलाः षोडश रवेः,
शतं षट् च त्रिंशत्सितमयमयूखाश्चरणजाः ।
य एते षष्टिश्च त्रिशतमभवंस्त्वच्चरणजा,[9]
[10]महाकौलैस्तस्मान्न हि तव शिवे कालकलना ॥९॥
त्रिकोणं चाधारं [11]त्रिपुरतनु तेऽष्टारमनघे,
[12]भवेत् स्वाधिष्ठानं पुनरपि दशारं मणिपुरम् ।
दशारं ते संवित्कमलमथ मन्वश्रकमुमे,
विशुद्धं स्यादाज्ञा शिव इति ततो बैन्दवगृहम् ॥१०॥

१-तया । २-काचित् । ३-महाकालपतगी, महानील-भुजगी । ४- सुधासिन्धोस्तस्मिन् । ५-विहरसि । ६-षट्त्रिंशत्त्रिशतयुतमाखण्ड०, षट्त्रिंशच्छतयुततया ७-भवेन्मूलाधारप्रभृति । ८-षट्त्रिंशद्द्वे, षट्त्रिंशद्वे सितमयि । ९-चरणगा । १०-महाकालस्तस्मात् । ११-त्रिभुवननुते० त्रिभुवननुतेष्वार० । १२-तव स्वाधिष्ठानं भगवति ।

त्रिकोणे ते वृत्तत्रितयमिभकोणे वसुदलं,
कलाश्रं मिश्रारे भवति भुवनाश्रे च[1] भुवनम् ।
चतुश्चक्रं शैवं निवसति [2]भगे शाक्तिकमुमे,
प्रधानैक्यं षोढा भवति च तयोः शक्तिशिवयोः ॥११॥
कलायां बिन्द्वैक्यं तदनु च तयोर्नादविभवे,
तयोर्नादेनैक्यं तदनु च कलायामपि तयोः ।
तयोर्बिन्दावैक्यं त्रितयविभवैक्यं परशिवे,
[3]तदेवं षोढैक्यं भवति हि सपर्या समयिनाम् ॥१२॥
कला नादो बिन्दुः क्रमश इह वर्णाश्च चरणं,
षडब्जं चाधारप्रभृतिकममीषां च मिलनम् ।
[4]तदेवं षोढैक्यं भवति खलु येषां समयिनां,
चतुर्थैक्यं तेषां भवति हि सपर्या समयिनाम् ॥१३॥
तडिल्लेखामध्ये स्फुरति मणिपूरे भगवती,
चतुर्धैक्यं तेषां भवति च चतुर्बाहुरुदिता ।
धनुर्बाणानिक्षूद्भवकुसुमजानङ्कुशवरं,
तथा पाशं बिभ्रत्युदितरविबिम्बाकृतिरुचिः[5] ॥१४॥
भवत्यैक्यं षोढा भवति भगवत्याः समयिनां,
मरुत्वत्कोदण्डद्युतिनियुतभासा समरुचिः ।
भवत्पाणिव्रातो दशविध इतीदं मणिपुरे,
भवानि ! प्रत्यक्षं तव वपुरुपास्ते न हि परम् ॥१५॥

इत्यैक्यनिरूपणम् ।

भवानि श्रीहस्तैर्वहसि फणिपाशं सृणिमथो,
धनुः पौण्ड्रं पौष्पं शरमथ जपस्त्रक्शुकवरौ ।

१-त्रिभुवनम् । २-दशे शक्तिकमुभे, भगे शाक्तकमुमे । ३-तथैवं । ४-तथैवं । ५-कृतिरुचिम् ।

अथ द्वाभ्यां मुद्रामभयवरदानैकरसिकां,[1]
क्वणद्वीणां द्वाभ्यां [2]त्वमुरसि कराभ्यां च बिभृषे ॥१६॥

त्रिकोणैरष्टारं त्रिभिरपि दशारं समुदभूद्,
दशारं भूगेहादपि च भुवनाश्रं समभवत् ।
ततोऽभून्नागारं नृपतिदलमस्मात् त्रिवलयं,
[3]चतुर्द्वाः प्राकारत्रितयमिदमेवाम्ब ! [4]शरणम् ॥१७॥

चतुःषष्टिस्तन्त्राण्यपि [5]कुलमतं निन्दितमभूद्,
यदेतन्मिश्राख्यं मतमपि भवेन्निन्दितमिह ।
शुभाख्याः पञ्चैताः श्रुतिसरणिसिद्धाः प्रकृतयो,
महाविद्यास्तासां भवति [6]परमार्थो भगवती ॥१८॥

स्मरो मारो मारः स्मर इति [7]परो मारमदनः,
स्मरानङ्गाश्चेति[8] स्मरमदनमाराः स्मर इति ।
त्रिखण्डः खण्डान्ते [9]कलितभुवनेश्यक्षरयुत-
श्चतुः पञ्चार्णास्ते त्रय इति च पञ्चाक्षरमनुः[10] ॥१९॥

त्रिखण्डे त्वन्मन्त्रे शशिसवितृवह्न्यात्मकतया,
स्वराश्चन्द्रे लीनाः सवितरि कलाः कादय इह ।
यकाराद्या वह्नावथ कषयुगं बैन्दवगृहे,
निलीनं सादाख्ये शिवयुवति नित्यैन्दवकले ॥२०॥

ककाराकाराभ्यां स्वरगणमवष्टभ्य निखिलं,
कलाप्रत्याहारात् सकलमभवद् व्यञ्जनगणः ।
त्रिखण्डे स्यात् प्रत्याहरणमिदमन्वक्कषयुग[11]-
क्षकारश्चाकाशेऽक्षर-तनुतया चाक्षरमिति ॥२१॥

१-०रसिके । २-त्वमुरसि च । ३-चतुर्धा । ४-चरणम् । ५-कुलनुतं निन्दित-मिदं तदेत० । ६-परमार्था, परमार्थो भगवति । ७-स्मरो । ८-०श्चैते । ९-कलित-भुवने ते क इति यः । १०-०मनोः । ११-०मञ्चत्कषयुगं ।

[1]विदेहेन्द्रापत्यं श्रुत इह ऋषिर्यस्य च मनो-
रयं चार्थः सम्यक् श्रुतिशिरसि तैत्तिर्यकऋचि ।
ऋषिं हित्वा चास्या हृदयकमले नैतमृषिमि-
त्यृचाभ्युक्तः पूजाविधिरिह भवत्याः समयिनाम् ॥२२॥
त्रिखण्डस्त्वन्मन्त्रस्तव च सरघायां निविशते,
श्रियो देव्याः शेषो यत इह समस्ताः शशिकलाः ।
त्रिखण्डे त्रैखण्ड्यं निवसति समन्त्रे च सुभगे,
षडब्जारण्यानी त्रितययुतखण्डे निवसति ॥२३॥
त्रयं चैतत् स्वान्ते परमशिवपर्यङ्कनिलये,
परे [2]सादाख्येऽस्मिन्निवसति चतुर्धैक्यकलनात् ।
स्वरास्ते लीनास्ते भगवति कलाश्रे च सकलाः,
ककाराद्या वृत्ते तदनु चतुरश्रे च यमुखाः ॥२४॥
हलो बिन्दुर्वर्गाष्टकमिभदलं शाम्भववपु-
श्चतुश्चक्रं [3]शक्रस्थितमनुभयं शक्तिशिवयोः ।
निशाद्या दर्शाद्याः श्रुतिनिगदिताः [4]पञ्चदशधा,
[5]भवेयुर्नित्यास्तास्तव जननि ! मन्त्राक्षरगणाः ॥२५॥
इमास्ताः षोडश्यास्तव च सरघायां शशिकला—
स्वरूपायां लीना निवसति तव श्रीशशिकला ।
अयं प्रत्याहारः श्रुत इह कलाव्यञ्जनगणः,
ककारेणाकारः स्वरगणमशेषं कथयति ॥२६॥
क्षकारः पञ्चाशत्कल इति [6]हलो बैन्दवगृहं,
[7]ककारादूर्ध्वं स्याज्जननि ! तव नामाक्षरमिति ।
भवेत्पूजाकाले मणिखचितभूषाभिरभितः,
प्रभाभिर्व्यालीढं भवति मणिपूरं सरसिजम् ॥२७॥

१-विदेहो नैर्ऋत्याः सुत इह ऋषिर्यः स च । २-सादाख्यास्मिन् । ३-शक्तास्थित०, शक्तोस्थित० । ४-पञ्चदश ता । ५-नित्याप्तास्तव । ६-हरो । ७-क्षाकारा० ।

वदन्त्येके वृद्धा मणिरिति जलं [1]तेन निबिडं,
परे तु त्वद्रूपं मणिधनुरितीदं समयिनः ।
अनाहत्या [2]नादः प्रभवति सुषुम्णाध्वजनित-
स्तदा वायोस्तत्र प्रभव इदमाहुः समायिनः ॥२८॥

तदेतत्ते संवित्कमलमिति संज्ञान्तरमुमे,
भवेत्संवित्पूजा भवति कमलेऽस्मिन् समयिनाम् ।
विशुद्ध्याख्ये चक्रे वियदुदितमाहुः समयिनः,
सदापूर्वो देवः शिव इति हिमानीसमतनुः ॥२९॥

त्वदीयैरुद्द्योतैर्भवति च विशुद्ध्याख्यसदनं,
भवेत्पूजा देव्या हिमकरकलाभिः समयिनाम् ।
सहस्रारे चक्रे निवसति कलापञ्चदशकं,
तदेतन्नित्याख्यं भ्रमति सितपक्षे समयिनाम् ॥३०॥

अतः शुक्ले पक्षे [3]प्रतिदिनमिह त्वां भगवतीं,
निशायां सेवन्ते निशि चरमभागे समयिनः ।
शुचि स्वाधिष्ठाने रविरुपरि संवित्सरसिजे,
शशी चाज्ञाचक्रे हरिहरविधिग्रन्थय इमे ॥३१॥

कलायाः षोडश्याः प्रतिफलितबिम्बेन सहितं,
तदीयैः पीयूषैः पुनरधिकमाप्लावितनुः ।
सिते पक्षे सर्वास्तिथय इह कृष्णेऽपि च समा,
यदा चामावास्या भवति न हि पूजा समयिनाम् ॥३२॥

इडायां पिङ्गल्यां चरत इह तौ सूर्यशशिनौ,
तमस्याधारे तौ यदि तु [4]मिलितौ सा तिथिरमा ।
तदाज्ञाचक्रस्थं शिशिरकरबिम्बे रविनिभं,
दृढव्यालीढं सद्विगलितसुधासारविसरम् ॥३३॥

१-लीननिबिडं । २-सादः । ३-प्रतिदिनमहस्त्वां । ४-तुलिती ।

महाव्योमस्थेन्दोरमृतलहरीप्लाविततनुः,
[1]प्रशुष्यद्वै नाडीप्रकरमनिशं प्लावयति तत् ।
यदाज्ञायां विद्युन्नियुतनियुताभाक्षरमयी,
[2]स्थिता विद्युल्लेखा भगवति विधिग्रन्थिमभिनत् ॥३४॥

ततो गत्वा ज्योत्स्नामयसमयलोकं [3]समयिनां,
पराख्या सादाख्या जयति शिवतत्त्वेन मिलिता ।
सहस्रारे पद्मे शिशिरमहसां बिम्बमपरं,
तदेव श्रीचक्रं सरघमिति तद्बैन्दवमिति ॥३५॥

वदन्त्येके सन्तः परशिवपदे तत्त्वमिलिते,
ततस्त्वं [4]षड्त्रिंशी भवसि शिवयोर्मेलनवपुः ।
त्रिखण्डेऽस्मिन् स्वान्ते परमपदपर्यङ्कसदने,
परे सादाख्येऽस्मिन्निवसति [5]चतुर्धैक्यकलनात् ॥३६॥

[6]क्षितौ वह्निर्वह्नौ वसुदलजले दिङ्मरुति दिक्-
[7]कलाश्रे मन्वश्रं दृशि [8]वसुरथो राजकमले ।
[9]प्रतिद्वैतग्रन्थिस्तदुपरि चतुर्द्वारसहितं,
[10]महीचक्रं चैकं भवति भगकोणैक्यकलनात् ॥३७॥

इति मन्त्रचक्रैक्यम्

[11]षडब्जारण्ये त्वां समयिन इमे पञ्चकसमां,
यदा संविद्रूपां विदधति च षोढैक्यकलिताम्[12] ।
मनो जित्वा[13] चाज्ञासरसिज इह प्रादुरभवत्,
तडिल्लेखा नित्या भगवति तवाधारसदनम् ॥३८॥

भवत्साम्यं केचित् त्रितयमिति[14] कौलप्रभृतयः,
परं तत्त्वाख्यं [15]चेत्यपरमिदमाहुः समयिनः ।

१-प्रशुष्यद्वे शन्त० । २-सिता । ३-ससमया । ४-षट्विंशा । ५-चतुर्थैक्य० । ६-महावह्नि० । ७-कलारे । ८-वसुरधो । ९-प्रतिद्वयं तद्ग्रन्थि० । १०-महाचक्रं । ११-षडब्जारण्यैस्त्वां । १२-०कलितम् । १३-०सरसिजमिह । १४-कौम्भप्र० । १५-चेत्स पर इद०, परमिद० ।

क्रियावस्थारूपं प्रकृतिरभिधापञ्चकसम,
तदेषां साम्यं [1]स्यादवनिषु च यो वेत्ति स मुनिः ॥३६॥

इत्यैक्यनिरूपणम्

वशिन्याद्या अष्टावकचटतपाद्याः प्रकृतयः,
स्ववर्गस्थाः स्वस्वायुधकलितहस्ताः स्वविषयाः ।
[2]यथावर्गं वर्णप्रचुरतनवो याभिरभवं-
स्तव प्रस्तारास्ते त्रय इति जगुस्ते समयिनः ॥४०॥

इमा नित्या वर्णास्तव चरणसम्मेलनवशा-
न्महामेरुस्थाः [3]स्युर्मनुमिलनकैलासवपुषः ।
वशिन्याद्या एता अपि [4]तव सबिन्द्वात्मकतया,
महीप्रस्तारोऽयं क्रम इति रहस्यं समयिनाम् ॥४१॥

इतिप्रस्तारत्रयनिरूपणम्

भवेन्मूलाधारं तदुपरितनं चक्रमपि तद्-
द्वयं तामिस्राख्यं शिखिकिरणसम्मेलनवशात् ।
तदेतत्कौलानां प्रतिदिनमनुष्ठेयमुदितं,
भवत्या वामाख्यं मतमपि परित्याज्यमुभयम् ॥४२॥

अमीषां कौलानां भगवति भवेत्पूजनविधि-
स्तव स्वाधिष्ठाने तदनु च भवेन्मूलसदने ।
अतो बाह्या पूजा भवति भगरूपेण च ततो
निषिद्धाचारोऽयं निगमविरहोऽनिन्द्यचरिते ॥४३॥

नवव्यूहं कौलप्रभृतिकमतं[5] तेन स विभु-
र्नवात्मा देवोऽयं जगदुदयकृद्भैरववपुः[6] ।

१-त्वामवनिषु । २-यदा वर्गा वर्णप्रचुरतरवो । ३-०स्थास्यन्मनु० । ४-च सहबि० । ५-प्रभृतिकमिदं । ६-०कृच्छैशववपुः ।

नवात्मा वामादि-प्रभृतिभिरिदं [1]भैरववपु-
र्महादेवी ताभ्यां जनकजननीमज्जगदिदम् ॥४४॥

भवेदेतच्चक्रद्वितयमतिदूरं समयिनां,
विसृज्यैतद्युग्मं तदनु मणिपूराख्यसदने ।
त्वया [2]सृष्टैर्वारप्रतिफलितसूर्येन्दुकिरणै-
[3]र्द्विधा लोके पूजां विदधति भवत्याः समयिनः ॥४५॥

अधिष्ठानाधारद्वितयमिदमेवं[4] दशदलं,
सहस्राराज्जातं [5]मणिपुरमतोऽभूद् दशदलम् ।
हृदम्भोजान्मूलान्नृपदलमभूत् स्वान्तकमलं,
तदेवैको बिन्दुर्भवति जगदुत्पत्तिकृदयम् ॥४६॥

सहस्रारं बिन्दुर्भवति च ततो बैन्दवगृहं,
तदेतस्माज्जातं जगदिदमशेषं [6]सकरणम् ।
ततो मूलाधाराद् द्वितयमभवत् तद्दशदलं,
सहस्राराज्जातं तदिति दशधा बिन्दुरभवत् ॥४७॥

तदेतद्बिन्दोर्यद्दशकमभवत्तत्प्रकृतिकं,
दशारं सूर्यारं नृपदलमभूत् स्वान्तकमलम्[7] ।
रहस्यं कौलानां द्वितयमभवन्मूलसदनं,
[8]तथाधिष्ठानं च प्रकृतिमिह सेवन्त[9] इह ते ॥४८॥

अतस्ते कौलास्ते भगवति दृढप्राकृतजना,
इति प्राहुः प्राज्ञाः कुलसमयमार्गद्वयविदः ।
महान्तः सेवन्ते सकलजननीं बैन्दवगृहे,
शिवाकारां नित्याममृतझरिकामैन्दवकलाम् ॥४९॥

१-बैन्दववपुः । २सृष्टि वारि० । ३-र्विभालोके । ४-०मेदद्दशः । ५-मणिपुर-मितो० । ६-नकरणम् । ७-०न्नेत्रकमलम् । ८-तदा । ९-मथ सेवन्त्विह च ते ।

इदं [1]कालोत्पत्तिस्थितिलयकरं पद्मनिकरं,
त्रिखण्डं श्रीचक्रं मनुरपि च[2] तेषां च मिलनम् ।
तदैक्यं षोढा वा भवति च चतुर्धेति च तथा,
तयोः साम्यं पञ्चप्रकृतिकमिदं शास्त्रमुदितम् ॥५०॥
उपास्तेरेतस्याः फलमपि च सर्वाधिकमभू-
त्तदेतत्कौलानां फलमिह हि चैतत्समयिनाम् ।
सहस्रारे पद्मे सुभगसुभगोदेति[3] सुभगे,
परं सौभाग्यं यत्तदिह तव सायुज्यपदवी ॥५१॥
[4]अतोऽस्याः संसिद्धौ सुभगसुभगाख्या गुरुकृपा-
कटाक्षव्यासङ्गात् स्रवदमृतनिष्यन्दसुलभा ।
तथा विद्धो योगी विचरति निशायामपि दिवा,
[5]दिवा भानू रात्रौ विधुरिव [6]कृतार्थीकृतमतिः ॥५२॥

इति परम-पूज्य-श्रीगौडपादाचार्यवर्य-विरचिता
सुभगोदयस्तुतिः
सम्पूर्णा ।

१-कौलोत्पत्ति० । २-तु । ३-०क्तेति सुभगं । ४-अतस्ते संसिद्धा । ५-दिवा वा रात्रौ वा । ६-कृतार्थीकृत इति ।